ष्यते । तत्र व्रीह्याग्रयणस्य काल उक्तः, वसन्तो यवाग्रयणस्य । तत्र हि तेषां प्रथमः पाक इति तन्त्रे विशेषाभावात् उभयोः सहवचनं तयोर्धाय्ये विराजौ च भवतः । "इतरत् पौर्णमासं तन्त्रं वैराजम्" इत्येतावतैवोक्तेऽपि तावन्मात्रविकारसिद्धौ सत्यां धाय्याविराजग्रहणं विकल्पेन दधन्वतोरपि प्रापणार्थम्१२ । आद्ययोर्विकल्पेनैता देवता गृह्यन्ते । यदि श्यामाकाग्रयणमस्यामेवेष्टौ समानतन्त्रेण क्रियते तदा सोमस्तृतीयो भवति१३ । इन्द्राग्न्योः सोमस्य चोक्ता याज्यानुवाक्यावृत्तिः"१४ । "य आहिताग्निराग्रयणेनानिष्ट्वा प्राश्नीयात्"श्रुतिः अतोऽकरणे दोषश्रवणान्नित्यत्वम् । अतएव कर्कपद्धतौ नित्यानि तु अग्निहोत्रदर्शपौर्णमासदाक्षायणाग्रयणपशुचातुर्मास्यादीनि अवश्यं कर्त्तव्यानीत्युक्तम् । २तन्निमित्तकेष्टौ नवशस्येष्टौ स्त्री गौरा० ङीप् । "इन्द्रेण सहितं यस्य हविराग्रयणं स्मृतम् । अग्निराग्रयणोनाम भानोरेवान्वयस्तु स इत्युक्ते ३सूर्यान्वयजे वह्निभेदे पु० । उपचारात् ४आग्रयणकाले "व्रीह्याग्रयणानन्तरं यवाग्रयणादर्वाग्व्रीहिभिरेव दर्शपौर्णमासौ कार्य्यौ यवाग्रयणानन्तरं प्राग्व्रीह्याग्रयणाद्यवैरेव । अथवा व्रीहिभिरेव इति" कर्कः । "शस्यान्ते नवशस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः" मनुव्याख्यायां पूर्व्वार्ज्जितधान्यादिशस्ये समाप्ते शरदि यवानामिति सूत्रकारवचनात् असमाप्ते पूर्व्वशस्ये नवशस्योत्पत्तौ आग्रयणेन यजेतेति शस्यक्षयस्यानियतत्वात् धनिनां बहुहायनजीवनोचितशस्यसम्भवाच्च" कुल्लू० आग्रयणञ्च कर्म्माशुद्धकाले न कर्त्तव्यम् यथोक्तम् "वाप्यारामतडागकूपेत्यादिनोपक्रम्य" "गोदानाग्रयण प्रपाप्रथमकोपाकर्म्म वेदव्रत"मित्यादीन्युद्दिश्य "अवणयोर्वेधं परीक्षां त्यज दृष्टत्वास्तमितशुत इज्यसितयोर्न्यूनामासे तथा" मुहू०चि० उक्तेः । "सोमयोगादिकर्माणि त्याज्यानि स्युर्मलिम्लुचे । तथैवाग्रयणाधानचातुर्मास्यादिकान्यहरपि"स्मृ०परि०उक्तेः ।"बाले वा यदि वृद्धे शुक्रे वास्तं गते गुरौ । मलमासइवेतानि वर्ज्जयेत्"इत्युपसर्गोक्ते ।

**आग्रह** पु० आ+ग्रह–अप् । १आवेशे आसक्तौ अभिनिवेशे "चलेऽपि काकस्य पदार्पणाग्रहः" नैष० । २आक्रमे ३अनुग्रहे ४ग्रहणे च ।

**आग्रहायण** पु०अग्रहायण्या मृगशीर्षनक्षत्रेण युक्ता पौर्णमासी आग्रहायणी अस्यत्र मासे ज्योत्स्ना० अण् । १चान्द्रमार्गशीर्षे मासि अग्रहायण्या युक्ता पौर्णमासी अण् । २चान्द्रमार्गशीर्षमासपौर्णमास्यां स्त्री । "आग्रहायण्या ऊर्द्ध्वं तिसृष्वेवाष्टकासु"स्मृतिः । "कार्त्तिक्या आग्रहायणी मासे" सि०कौ० । यथा च मृगशीर्षनक्षत्रसम्बन्धात् मासस्य मार्गशीर्षत्वं तथोक्तम् सू०सि० "नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः" इति "पूर्णमास्यां मृगशीर्षनक्षत्रयोगात् मार्गशीर्षश्चान्द्रमासः मृगशीर्ष एव अग्रहायणीनामा पौर्णमास्यां तत्सम्बन्धयोग्यत्वमेव तदर्थः अत एव "कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम् । अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्" सू०सि० तेन कृत्तिकारोहिणीभ्यां कार्त्तिकी मृगार्द्राभ्यां मार्गशीर्ष इत्यादि क्रमेण नक्षत्रद्वयसम्बन्धस्तत्रोक्तः ।

**आग्रहाय(ण)णिक** न० आग्रहायण्यां देयमृणं वुञ् ठञ् वा । आग्रहायण्यां देये ऋणे ।

**आग्रहायणिक** पु० आग्रहायणी पूर्णिमाऽस्मिन्मासे ठक् । चान्द्रमार्गशीर्षे मासि । [ ( अग्रदानी ) विप्रे ।

**आग्रहारिक** त्रि० अग्रहारोऽग्रभागोनियतं दीयतेऽस्मै ठञ् ।

**आग्रायण** पुंस्त्री अग्रनामकस्य ऋषेः गोत्रापत्यम् नडा० फक् । अग्रनामर्षेः गोत्रापत्ये १अग्रेऽयनं शस्यस्यास्यस्य ज्योत्स्ना० अण् । २नवशस्येष्टौ ।

**आघट्टक** पु० आघट्टयति रोगान् ण्वुल् । रक्तापामार्गे राजनि० चालके त्रि० । [नयां नमस्ततः" माघः ।

**आघट्टना** स्त्री आ+घट्ट–युच् । चालनायां "रणद्भिराघट्ट-

**आघट्टित** त्रि० आ+घट्ट–क्त । चालिते ।

**आघमर्षण** न० अघमर्षणे विहितम् अण् । अघानां नाशनाय विहिते सूक्तभेदे अघमर्षणशब्दे तच्च दर्शितम् ।

**आघर्ष** पु० आ+घृष–घञ् । मर्द्दने "गण्डस्थलाघर्षगलन्मदोदक" माघः । भावे ल्युट् । आघर्षणमप्यत्र न० ।

**आघाट** पु० आ+हन–कर्त्तरि संज्ञायां घञ् पृ० नि० तस्य टः । १अपामार्गे २ आघातके त्रि० । "यत्राघाटाः कर्कर्य्यः संवदन्ति" श्रुतिः ।

**आघाटिन्** त्रि० आ+हन–णिनि पृ०नि० । आघातके "आघाटिभिरिव धावयन्" ऋ०१,०,१४६,२ ।

**आघात** पु० आ+हन–घञ् । १वधे २आहनने ३ताड़ने च तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः" मेघ० । "अभ्यस्यन्ति तटाघातं निर्जितैरावतागजाः" कुमा० । "सूत्राघातःस उच्यते" सुश्रुतः । आधारे घञ् । ४बधस्थाने । "आघातं नीयमानस्य बध्यस्येव" ।

**आघातन** न० आहन्यतेऽत्र आ+हन–स्वार्थे णिच्–आधारे